अपि च ।
"सत्पुत्त्रेण च जातेन वेणोऽपि त्रिदिवं ययौ ।
पुन्नाम्नरकात्त्रातः स तेन सुमहात्मना ॥"
इति विष्णुपुराणे । १ । १३ । ४१ ॥ * ॥
विद्यादिरहितस्य पुत्त्रस्य निन्दा यथा,—
"तया गवा किं क्रियते या न दोग्ध्री न गर्भिणी ।
कोऽर्थः पुत्त्रेण जातेन यो न विद्वान्न धार्म्मिकः ॥
एकेनापि सुपुत्त्रेण विद्यायुक्तेन धीमता ।
कुलं पुरुषसिंहेन चन्द्रेण गगनं यथा ॥
एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वनं सुवासितं सर्व्वं सुपुत्त्रेण कुलं यथा ॥
एको हि गुणवान् पुत्त्रो निर्गुणेन शतेन किम् ।
चन्द्रो हन्ति तमांस्येको न च ज्योतिः सहस्रशः ॥
लालयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्त्रं मित्रवदाचरेत् ॥
जायमानो हरेद्दारान् वर्द्धमानो हरेद्धनम् ।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्त्रसमो रिपुः ॥
शौर्य्ये तपसि दाने वा यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥"
इति गारुड़े ११४।११५ अध्यायौ ॥ * ॥
स च मध्यमोत्तमाधमभेदेन त्रिविधः । यथा,—
"यदुपात्तं यशः पित्रा धनं वीर्य्यमथापि वा ।
तन्न ह्रापयते यस्तु स नरो मध्यमः स्मृतः ॥
तदीर्य्याभ्यधिकं यस्तु पुनरन्यत् स्वशक्तितः ।
निष्पादयति तं प्राज्ञा वदन्ति नरसत्तमम् ॥
यः पित्रा समुपात्तानि धनवीर्य्ययशांसि च ।
न्यूनतां नयति प्राज्ञास्तमाहुः पुरुषाधमम् ॥"
इति मार्कण्डेयपुराणम् ॥ * ॥
अपि च ।
"उत्तमश्चिन्तितं कुर्य्यात् प्रोक्तकारी च मध्यमः ।
अधमोऽश्रद्धया कुर्य्यादकर्त्ताच्चरितं पितुः ॥"
इति महाभारतम् ॥
(अनुरूपपुत्त्रप्राप्त्युपायो यथा,—
"ततः समाप्ते कर्म्मणि पूर्व्वं दक्षिणपादमभिहरन्ती प्रदक्षिणमग्निमनु परिक्रामेत् ततो ब्राह्मणान् स्वस्ति वाचयित्वा सह भर्त्राज्यशेषं प्राश्नीयात् । पूर्व्वं पुमान् पश्चात् स्त्री नचोच्छिष्टमवशेषयेत् । ततस्तौ सह संवसेतामष्टरात्रं तथाविधपरिच्छदावेव तथेष्टं पुत्त्रं जनयेताम् । या तु स्त्री श्यामं लोहिताक्षं व्यूढोरस्कं महाबाहुं पुत्त्रमाशासीत । या वा कृष्णं कृष्णमृदुदीर्घकेशं शुक्लाक्षं शुक्लदन्तं तेजस्विनमात्मवन्तम् । एष एवानयोरपि होमविधिः किन्तु परिबर्हवर्ज्यं वर्ण्यं स्यात् पुत्त्रवर्णानुरूपस्तु यथाशीरेव तयोः परिवर्होऽन्यः कार्य्यः स्यात् । द्विजेभ्यः शूद्रा तु नमस्कारमेव कुर्य्यात् देवगुरुतपस्विसिद्धेभ्यश्च । या या च यथाविधं पुत्त्रमाशासीत तस्यास्तस्यास्तान्तां पुत्त्राशिषमनुनिशम्य तांस्तान् जनपदान् मनसानुपरिक्रामयेत् । ततो या या येषां येषां जनपदानां मनुष्याणामनुरूपं पुत्त्रमाशासीत सा सा तेषां तेषां जनपदानामाहारविहारोपचारपरिच्छदाननुविधीयस्वेति वाच्या स्यात् । इत्येतत् सर्व्वं पुत्त्राशिषां समृद्धिकरं कर्म्म व्याख्यातम् ।"
"तथा च कुर्व्वती शनैः शनैः पूर्व्वं प्रवाहेत ततोऽनन्तरं बलवत्तरमिति तस्याश्च प्रवाहमाणायां स्त्रियः शब्दं कुर्य्युः प्रजाता प्रजाता धन्यं धन्यं पुत्त्रमिति तथास्या हर्षेणाप्यायन्ते प्राणाः ।" इति चरके शारीरस्थानेऽष्टमेऽध्याये ॥)

पुत्त्रकः, पुं, (पुत्त्र + स्वार्थे संज्ञायामनुकम्पायां वा कन् ।) पुत्त्रः । (यथा, विष्णुपुराणे ।२।१३।२१।
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्त्रक ! ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान् ॥")
शरभः । धूर्त्तः । शैलविशेषः । वृक्षभेदः । इति मेदिनी । के, १२४ ॥ पतङ्गकः । अनुकम्पान्वितजनः । इति शब्दरत्नावली ॥

पुत्त्रकन्दा, स्त्री, (पुत्त्रप्रदो कन्दोऽस्याः । अस्याः कन्दस्य गर्भदोषनाशेन पुत्त्रदातृत्वात् तथात्वम् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

पुत्त्रका, स्त्री, (पुत्त्र + स्वार्थे संज्ञायां वा कन् । टाप् । "न यासयोः ।" ७ । ३ । ४५ । इत्यस्य "त्यतकापुत्त्रिकावृन्दारकाणां वेति वक्तव्यम् ।" इति वार्त्तिकोक्त्या ङीन इत्वमस्य पक्षेऽकारः ।) पुत्त्रिका । इति शब्दरत्नावली ॥

पुत्त्रजीवः, पुं, (पुत्त्रं गर्भं जीवयतीति । जीवि + अण् ।) वृक्षविशेषः । जियापुता इति भाषा । तत्पर्य्यायः । श्लीपदापहः २ । इति त्रिकाण्डशेषः ॥ कुमारजीवः ३ पुत्त्रञ्जीवकः ४ । इति रत्नमाला ॥ पवित्रः ५ गर्भदः ६ सुतजीवकः ७ ॥ अस्य गुणाः । हिमत्वम् । वृष्यत्वम् । श्लेष्मगर्भजीवदातृत्वम् । चक्षुष्यत्वम् । पित्तशमनत्वम् । दाहतृष्णानिवारकत्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । वातकारित्वम् । सृष्टमूत्रमलत्वम् । स्वादुत्वम् । पटुत्वम् । कटुत्वम् । इति भावप्रकाशः ॥

पुत्त्रञ्जीवकः, पुं, (पुत्त्रं गर्भं जीवयतीति । जीवि + ण्वुल् । द्वितीयाया अलुक् ।) पुत्त्रजीवकवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते चिकित्सितस्थाने १८ अध्याये ।
"अनेनैव विधानेन पुत्त्रञ्जीवकजं रसम् ।
प्रयुञ्जीत भिषक् प्राज्ञः कालसात्म्यविभागवित् ॥")
पुत्त्रस्य जीवके, त्रि ॥

पुत्त्रदा, स्त्री, (पुत्त्रं गर्भं ददाति सेवनेनेति । दा + कः ।) वन्ध्याकर्कोटकी । लक्ष्मणाकन्दः । गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

पुत्त्रदात्री, स्त्री, (पुत्त्रं ददाति सेवनेनेति । दा + तृच् + ङीप् । वन्ध्यादोषनाशित्वादस्यास्तथात्वम् ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । वातारिः २ भ्रमरी ३ श्वेतपुष्पिका ४ वृत्तपत्रा ५ अतिगन्धालुः ६ पेशीकाता ७ सुवक्षरी ८ । अस्या गुणाः । वातकटुष्णकफनाशित्वम् । सुरभित्वम् । सर्व्वदा पथ्यत्वम् । वन्ध्यादोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पुत्त्रप्रदा, स्त्री, (पुत्त्रं प्रददाति सेवनेनेति । प्र + दा + कः । टाप् ।) चविका । इति राजनिर्घण्टः ॥

पुत्त्रभद्रा, स्त्री, (पुत्त्रस्य भद्रमस्या इति ।) वृहज्जीवन्ती । इति राजनिर्घण्टः ॥

पुत्त्रशृङ्गी, स्त्री, (पुत्त्रं पवित्रं शृङ्गमिव पुष्पमस्याः । गौरादित्वात् ङीष् ।) अजशृङ्गी । इति राजनिर्घण्टः ॥

पुत्त्रश्रेणी स्त्री, (पुत्त्राणां तत्सन्तानानां श्रेणिरत्र । ङीप् ।) मूषिकपर्णी । इति रत्नमाला ॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये ।
"श्यामा महाश्यामा त्रिवृद्दन्ती शङ्खिनी तिल्वककम्पिल्लकरम्यककृमुकपुत्त्रश्रेणीगवाक्षी राजवृक्षकरञ्जद्वयगुडूचीसप्तलाच्छगलान्त्रीसुधाः सुवर्णक्षीरी चेति ॥")

पुत्त्रसूः, स्त्री, (पुत्त्रं सूते इति । सू + क्विप् ।) पुत्त्रजनिका । यथा,—
"पुत्त्रसूः पुण्यभूमिः स्याद्वन्तः पुत्त्रिकाप्रसूः ॥"
इति शब्दरत्नावली ॥

पुत्त्रान्नादः, त्रि, (पुत्त्रस्य अन्नं तदुपहृतमन्नमत्तीति । अद + अण् ।) पुत्त्रान्नभोजी । तत्पर्य्यायः । कुटीचकः २ । इति त्रिकाण्डशेषः ॥

पुत्त्रिका, स्त्री (पुत्त्री + स्वार्थे कन् टाप् । "केऽणः ।" ७ । ४ । १३ । इति ह्रस्वः ।) कन्या । तत्पर्य्यायः । आत्मजा २ दुहिता ३ पुत्त्री ४ तनुजा ५ सुता ६ अपत्यम् ७ पुत्त्रका ८ स्वजा ९ तनया १० नन्दिनी ११ । इति शब्दरत्नावली ॥ (यथा, पञ्चतन्त्रे । ३ । ८२१ ।
"पुत्त्रिकाब्रवीत् । तात ! अतिदहनात्मकोऽयं नाहमेनमभिलषामि ॥" पुत्त्रीव प्रतिकृतिरस्या इति । पुत्त्री + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ह्रस्वश्च ।) पुत्तलिका । यावतूलकः । इति मेदिनी । के, १२४ ॥ (यथा, सुश्रुते सूत्रस्थाने । १६ अध्याये ।
"पीठोपमपालिरुभयतः क्षीणपुत्त्रिकाश्रितो निर्व्वेधिमःशुष्कशष्कुलसम विषमपालिर्यां योजिमः ॥")
पुत्त्रस्वरूपत्वेन कृता कन्या । तद्भर्त्तारः पुत्त्रस्तु कन्यादातुः पुत्त्रो भवतीति । यथा, मनौ । ९ । १२७ – १२८ ।
"अपुत्त्रोऽनेन विधिना सुतां कुर्व्वीत पुत्त्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरम् ॥"
यथा च महाभारते । १ । ६६ । १२ ।
"ताः सर्व्वालक्षणवत्याढ्याः कन्याः कमललोचनाः ।
पुत्त्रिकाः स्थापयामास नष्टपुत्त्रः प्रजापतिः ॥")

पुत्त्रिकापुत्त्रः, पुं, (पुत्त्रिकायाः जातोऽस्याः पुत्त्रो स हि मदीयः पुत्त्रो भविष्यतीति पुत्त्रस्वरूपत्वेन कृतायाः सुतायाः पुत्त्रः ।) पुत्त्रिकायाः सुतः । स च औरससमः । यथाह वशिष्ठः ।
"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्त्रः स मे पुत्त्रो भवेदिति ॥"
अथवा पुत्त्रिकैव सुतः पुत्त्रिकासुतः सोऽप्यौरससम एव पितृवयवानामल्पत्वान्मातृवयवानां